**दिनाङ्क :- 01.08.2026**

**प्रात: - 06:55**

## प्रधानमन्त्री - आन्ध्रप्रदेश-कर्नाटक-भ्रमणम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य एकदिवसीय-आन्ध्रप्रदेश-कर्नाटक-यात्रायां भविष्यति। आन्ध्रप्रदेशे प्रधानमन्त्री भोगापुरम इत्यत्र अल्लूरि-सीतारामराजू-अन्ताराष्ट्रिय-विमानस्थानकस्य उद्घाटनं करिष्यति। सार्वजनिक-निज-सहभागिता-प्रारूपस्य अन्तर्गतं षट्शताधिक-पञ्चसहस्र-कोटि-रूप्यकाधिकेन व्ययेन निर्मितं तदन्ताराष्ट्रीयविमानस्थानकं प्रतिवर्षं षष्टिलक्ष-यात्रिणां सेवाप्रदातुं विनिर्मितम् अस्ति। प्रधानमन्त्री अशीत्यधिक-अष्ट-शताधिकैक-सहस्रकोटि-रूप्यकाधिक-व्यययुताः राष्ट्रियराजमार्ग-परियोजनाः राष्ट्राय समर्पयिष्यति, तासां शिलान्यासमपि करिष्यति। आन्ध्रप्रदेश-यात्रानन्तरं प्रधानमन्त्री कर्नाटकस्य मैसूरुनगरं गमिष्यति, यत्र स्वामीविवेकानन्द-सांस्कृतिक-युवकेन्द्रस्य 'विवेक-स्मारकस्य' उद्घाटनं करिष्यति।

## प्रधानमन्त्री – युवभ्यः सन्देशः

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् अपशब्दप्रयोगः द्वेषभावना च कस्यापि समस्यायाः समाधानं न भवतः। असौ मार्गभ्रष्टेभ्यः युवभ्यः करुणाभावम् आवहन् अवदत् यत् ते दण्डनीयाः न, अपितु राष्ट्रनिर्माणस्य राष्ट्रहितस्य च भावनया सम्यग्मार्गे प्रेरणीयाः। सामाजिकसञ्चारपटलेषु प्रसारिते एकस्मिन् दृश्यश्रव्यसन्देशे प्रधानमन्त्री राष्ट्रियराजधान्याः जन्तरमन्तर-स्थले सद्यः एव जातायाः तस्याः घटनायाः उल्लेखम् अकरोत्, यस्मिन् तस्मै, तस्य दिवङ्गतमात्रे च अपशब्दाः प्रयुक्ताः आसन्।

सः अवदत् यत् एषा घटना देशविदेशेषु बहुभिः जनैः दृष्टा। एतादृशस्य आचरणस्य विषये समाजे विद्यमानः आक्रोशः निराशा च स्वाभाविकौ स्तः। प्रधानमन्त्री अवदत् यत् एतादृशान् युवकान् न्यायालयीयप्रक्रियासु न निवेशयेत्, सामाजिक-तिरस्कारस्य भाजनं वा न कुर्यात्; अपितु समाजेन तान् सस्नेहं स्वीकृत्य सम्यग्मार्गः प्रदर्शनीयः।

## मन्त्रिमण्डलम् – प्रधानमन्त्री-सूर्यसरोवर-योजना

केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री-सूर्यसरोवर-योजना अनुमोदिता। एषा योजना ऊर्जासञ्चयन-प्रणालीभिः युक्तानां फ्लोटिंग सोलर फोटोवोल्टिक इति परियोजनानां विकासाय प्रवर्तिता अस्ति। केन्द्रीयमन्त्रिमण्डलस्य उपवेशनानन्तरं नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् अस्याः योजनायाः अन्तर्गतं पञ्चसहस्र-मेगावाट्-मितानां क्षमतायुक्तानां फ्लोटिंग सोलर फोटोवोल्टिक इति परियोजनानां विकासः भविष्यति। ताभिः सह स्थापितानां ऊर्जासञ्चयन-प्रणालीनां न्यूनतम-सञ्चयन-क्षमता द्विहोरात्मिका भविष्यति। केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री-किसान-सम्मान-निधि-योजनायाः अस्मात् वर्षात् एकत्रिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं प्रवर्तनस्य निरन्तरतायै अपि अनुमोदनं प्रदत्तम्।

**पाकिस्तानम्**

भारतम् अवदत् यत् पाकिस्तानाधिकृतस्य जम्मू-कश्मीरप्रदेशस्य तथाकथितानि निर्वाचनानि पाकिस्तान-प्रशासनस्य अपमानास्पदम् एव सन्ति। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् पाकिस्तानस्य प्रशासनं पी.ओ.जे.के. इत्यत्र शान्तिप्रियाणां नागरिकाणां विरुद्धं निष्ठुरं बलप्रयोगं निरन्तरं करोति। असौ अवदत् यत् अस्य परिणामस्वरूपं चत्वारिंशतोऽधिकाः नागरिकाः मृताः, बहवश्च गम्भीररूपेण व्रणिताः अभवन्।

**विदेशमन्त्री**

विदेशमन्त्री डॉ. एस्. जयशङ्करः गतसायं ईरानदेशस्य विदेशमन्त्रिणा अब्बास् अराघची इत्यनेन सह दूरभाषया वार्तालापम् अकरोत्। अस्मिन् वार्तालापे सः अस्मिन् क्षेत्रे प्रवर्तमानायाः शत्रुतायाः विषये भारतस्य गभीरां चिन्तां प्रकटितवान्। वार्तालापस्य समये डॉ. जयशङ्करः दृढतया आग्रहम् अकरोत् यत् वाणिज्यिक-नौवहनस्य नाविकानां च उपरि आक्रमणानि कस्यामपि परिस्थितौ न भवेयुः। सः पुनरपि प्रतिपादितवान् यत् भारतं केनापि दलेन कृतम् एतादृशम् आक्रमणं निन्दति।

**राष्ट्रमण्डल-क्रीडा**

राष्ट्रमण्डल-क्रीडासु, भारतस्य ऐतिहासिकं प्रथमं जूडो-स्वर्णपदकं, तथा मुष्टामुष्टि-क्रीडायाम् एकः अद्भुतः दिवसः, यत्र दश मुष्टामुष्टि-क्रीडकाः अन्तिमायां क्रीडायां प्रविष्टवन्तः। ग्लास्गो-नगरे राष्ट्रमण्डल-क्रीडासु देशस्य क्रीडकानां कृते अन्यः स्मरणीयः दिवसः अभवत्। तेनैव सह राष्ट्रमण्डल-क्रीडासु भारतस्य पदकसंख्या त्रयोविंशति यावत् वर्धिता, यस्मिन् पञ्च स्वर्णपदकानि, द्वादश रजतपदकानि, षट् कांस्यपदकानि च सन्ति।

**।। इति वार्ता:।।**